# Shadgosvamyashtakam

# ષડ્ગોસ્વામ્યષ્ટકમ્

## Document Information

Text title : Shadgosvamyashtakam Obeisances unto the six Gosvamis

File name : ShaDgosvAmyaShTakam.itx

Category : deities_misc, aShTaka, krishna, gurudev

Location : doc_deities_misc

Author : Shrinivas Acharya Prabhu

Proofread by : PSA Easwaran

Latest update : February 22, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 23, 2021

*sanskritdocuments.org*

# Shadgosvamyashtakam

# ષડ્ગોસ્વામ્યષ્ટકમ્

Obeisances unto the six Gosvamis, namely Shri Rupa Gosvami,
Shri Sanatana Gosvami, Shri Raghunatha Bhatta Gosvami,
Shri Raghunatha dasa Gosvami, Shri Jiva Gosvami,
and Shri Gopala Bhatta Gosvami

કૃષ્ણોત્કીર્તનગાનનર્તનપરૌ પ્રેમામૃતામ્ભોનિધી
    ધીરાધીરજનપ્રિયૌ પ્રિયકરૌ નિર્મત્સરૌ પૂજિતૌ ।
શ્રીચૈતન્યકૃપાભરૌ ભુવિ ભુવો ભારાવહન્તારકૌ
    વન્દે રૂપસનાતનૌ રઘુયુગૌ શ્રીજીવગોપાલકૌ ॥ ૧॥

નાનાશાસ્ત્રવિચારણૈકનિપુણૌ સદ્ધર્મસંસ્થાપકૌ
    લોકાનાં હિતકારિણૌ ત્રિભુવને માન્યૌ શરણ્યાકરૌ ।
રાધાકૃષ્ણપદારવિન્દભજનાનન્દેન મત્તાલિકૌ
    વન્દે રૂપસનાતનૌ રઘુયુગૌ શ્રીજીવગોપાલકૌ ॥ ૨॥

શ્રીગૌરાઙ્ગગુણાનુવર્ણનવિધૌ શ્રદ્ધાસમૃદ્ધ્યન્વિતૌ
    પાપોત્તાપનિકૃન્તનૌ તનુભૃતાં ગોવિન્દગાનામૃતૈઃ ।
આનન્દામ્બુધિવર્ધનૈકનિપુણૌ કૈવલ્યનિસ્તારકૌ
    વન્દે રૂપસનાતનૌ રઘુયુગૌ શ્રીજીવગોપાલકૌ ॥ ૩॥

ત્યક્ત્વા તૂર્ણમશેષમણ્ડલપતિશ્રેણીં સદા તુચ્છવત્
    ભૂત્વા દીનગણેશકૌ કરુણયા કૌપીનકન્થાશ્રિતૌ ।
ગોપીભાવરસામૃતાબ્ધિલહરીકલ્લોલમગ્નૌ મુહુ-
    ર્વન્દે રૂપસનાતનૌ રઘુયુગૌ શ્રીજીવગોપાલકૌ ॥ ૪॥

કૂજત્કોકિલહંસસારસગણાકીર્ણે મયૂરાકુલે
    નાનારત્નનિબદ્ધમૂલવિટપશ્રીયુક્તવૃન્દાવને ।
રાધાકૃષ્ણમહર્નિશં પ્રભજતૌ જીવાર્થદૌ યૌ મુદા
    વન્દે રૂપસનાતનૌ રઘુયુગૌ શ્રીજીવગોપાલકૌ ॥ ૫॥

સઙ્ખ્યાપૂર્વકનામગાનનતિભિઃ કાલાવસાનીકૃતૌ
નિદ્રાહારવિહારકાદિવિજિતૌ ચાત્યન્તદીનૌ ચ યૌ ।
રાધાકૃષ્ણગુણસ્મૃતેર્મધુરિમાઽઽનન્દેન સમ્મોહિતૌ
વન્દે રૂપસનાતનૌ રઘુયુગૌ શ્રીજીવગોપાલકૌ ॥ ૬॥

રાધાકુણ્ડતટે કલિન્દતનયાતીરે ચ વંશીવટે
પ્રેમોન્માદવશાદશેષદશયા ગ્રસ્તૌ પ્રમત્તૌ સદા ।
ગાયન્તૌ ચ કદા હરેર્ગુણવરં ભાવાભિભૂતૌ મુદા
વન્દે રૂપસનાતનૌ રઘુયુગૌ શ્રીજીવગોપાલકૌ ॥ ૭॥

હે રાધે વ્રજદેવીકે ચ લલિતે હે નન્દસૂનો કુતઃ
શ્રીગોવર્ધનકલ્પપાદપતલે કાલિન્દીવને કુતઃ ।
ઘોષન્તાવિતિ સર્વતો વ્રજપુરે ખેદૈર્મહાવિહ્વલૌ
વન્દે રૂપસનાતનૌ રઘુયુગૌ શ્રીજીવગોપાલકૌ ॥ ૮॥

ઇતિ શ્રીશ્રીનિવાસાચાર્યવિરચિતં ષડ્ગોસ્વામ્યષ્ટકં સમ્પૂર્ણમ્ ।

*Shadgosvamyashtakam*

pdf was typeset on November 23, 2021

Please send corrections to *sanskrit@cheerful.com*